International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(5): 08-12
© 2023 IJSR
www.anantaajournal.com
Received: 08-06-2023
Accepted: 12-07-2023

**Swagatika Mishra**
Ph.D., Department of Sanskrit,
Sambalpur University,
Sambalpur, Odisha, India

**Corresponding Author:**
**Swagatika Mishra**
Ph.D., Department of Sanskrit,
Sambalpur University,
Sambalpur, Odisha, India

# रघुवंशे वैदिकसंस्काराः

## Swagatika Mishra

**सारांश**
भारतवर्षे वैदिकसंस्काराणां स्थानमत्यन्तं महत्त्वपूर्णम् । जन्मजन्मान्तरेभ्यः मानवस्य अन्तःकरणे स्थितानां दुष्कर्माणां विनाशाय सुज्ञानस्य उदयनिमित्तं च संस्काराणां प्रयोजनं वर्तते । हिन्दुधर्मस्य संस्कारविषयकाः नीतिनियमाः वेदे वर्णिताः । एतदतिरिक्तं समग्रब्राह्मण-साहित्ये, धर्मसूत्रे तथा स्मृतिग्रन्थे संस्कारविषये उल्लिखिताः सन्ति । उभयोः आध्यात्मिक-सामाजिकयोः दृष्टिकोणतः संस्काराणां प्रयोजनमत्यावश्यकम् । अतः वहुप्राचीनकालादेव अस्माकं ऋषिमनिषिभिः षोडशसंस्काराणां प्रचलनं कृतम् । मानवजीवनस्य पूर्णतायै षोडशसंस्काराणां महत्त्वं परिदृश्यते । संस्कृतकाव्यजगति कविताकामिनीकान्तः महाकविकालिदासः तस्य काव्येषु वैदिकसंस्काराणां वर्णनं कृतवान् । अस्मिन् शोधप्रबन्धे महाकवेः रघुवंशमहाकाव्ये वर्णितानां वैदिकसंस्काराणां विवेचननिमित्तं विहितोऽस्ति प्रयासः ।

**कूटशब्दाः** संस्कारः, संस्काराणां महत्त्वम्, महाकविः कालिदासः, रघुवंशमहाकाव्यम्, रघुवंशे वैदिकसंस्काराः

**प्रस्तावना**
'सम्'उपसर्गपूर्वकात् 'कृ'धातोः 'घञ्'प्रत्यये संस्कारशब्दः निष्पन्नो भवति । यस्यार्थः भवति धार्मिकविधिविधानम् । अथवा आध्यात्मिक-सौन्दर्यवर्धनस्य वा आन्तरिकपरिष्कृतस्य कार्यमिदम् । संस्कारशब्दस्यार्थं एवमेव भवति - 'संस्क्रियते अलंक्रियते अनेन इति संस्कारः'। अर्थात् येन शरीर-मन-आत्मा च परिष्कृता, अलंकृता, सुशोभिता च भवति सः संस्कारः इत्युच्यते । संस्कारविषये चरकसंहितायां कथितमस्ति - 'संस्कारो हि गुणान्तराधानमुच्यते'। संस्कारस्य उदयः प्राचीनकालेऽभवत् । कालक्रमे अयं परिवर्त्तितो भूत्वा अद्यापि जीवितोऽस्ति । यतः अस्य उपादेयता आधुनिक-वैज्ञानिकयुगेऽपि वर्तते । जन्मनः आरभ्य श्मशानान्तं यावत् मानवजीवनं विभिन्नामवस्थाम् अतिक्रम्य अग्रेसरति । कस्यां अवस्थायां किमेव करणीयं यत् करणेन मानवजीवनस्य पूर्णता आयाति इति विषयः धर्मशास्त्रविद्भिः विचारितो लक्ष्यते । पुनश्च संस्कारैः द्विजातीनां गर्भसम्बन्धीयं तथा बीजसम्बन्धीयं दोषं दूरीभूतं भवतीति महर्षि-मनुना उक्तं यथा –

"वैदिकैः कर्मभिः पुण्यनिषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥
गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥" (१)

संस्काराणां संख्याविषये भिन्ना भिन्ना मताः दृश्यन्ते । यथा आश्वलायन-गृह्यसूत्रे द्वादशसंस्काराः, पारस्कर-वौधायन-वाराहगृह्यसूत्रेषु त्रयोदशसंस्काराः, वैखानसगृह्यसूत्रे अष्टादशसंस्काराः सन्ति इति कथितमस्ति । मनुस्मृतौ संस्कारः त्रयोदशः भवतीति । परन्तु परवर्त्तीषु स्मृतिग्रन्थेषु षोडशसंस्काराणां उल्लेखमस्ति । षोडशसंस्काराः यथा - १.गर्भधानम् २.पुंसवनम् ३.सीमन्तोन्नयनम् ४.जातकर्म ५.नामकरणम् ६.निष्क्रमणम् ७.अन्नप्राशनम् ८.चूडाकर्म ९.कर्णवेधः १०.विद्यारम्भः ११.उपनयनम् १२.वेदारम्भः १३.केशान्तः १४.समावर्त्तनम् १५.विवाहः १६.अन्त्येष्टिः च।

कविकुलगुरुः कालिदासः संस्कृतसाहित्यजगति विशिष्टस्थाने विराजते । सः न केवलं संस्कृतवाङ्मयस्य अपि तु विश्ववाङ्मयस्य मुकुटालंकारः । तस्य नैकाः कृतयः सन्ति । ‘रघुवंशा’ख्यं महाकाव्यं कवेः अनवद्यकृतिः भवति । कालिदासस्य नाट्यकौशलं यथा शाकुन्तले संलक्ष्यते तथैव तस्य कवित्वपरिपाको रघुवंशमहाकाव्ये निरीक्ष्यते । महाकाव्येऽस्मिन् ऊनविंशतिः सर्गाः विद्यन्ते । रमायणमधिकृत्य महाकविना काव्यमिदं प्रणीतम् । अस्य महाकाव्यस्य नामकरणं राजारघोः नामानुसारं भवति । महाकविः कालिदासः अत्र भुवनप्रसिद्धानां रघुवंशीयानां राज्ञां चरितं वर्णयति । एते रघुवंशीयाः राजानः जन्मनः आरभ्य निषेकादिसंस्कारैः पवित्राः आसन् । महाकविना रघुवंशमहाकाव्ये एतेषां संस्काराणां आलोचना कृता । अस्मिन् लेखे रघुवंशमहाकाव्ये वर्णितानां वैदिकसंस्काराणां विवेचना कृतास्ति ।

**पुंसवनसंस्कारः** गर्भधानादनन्तरं द्वितीये तृतीये वा मासि क्रियमाणः संस्कारः पुंसवनमित्युच्यते । ‘पुमान् प्रसूयते कर्मणा तत्पुंसवनम्’ अर्थात् पुत्रसन्तानं प्राप्त्यर्थं संस्कारोऽयं क्रियते । अस्मिन् संस्कारे पत्न्याः दक्षिणे नासारन्ध्रे पतिः वटवृक्षस्य रसं सिञ्चति । महाकविकालिदासेन रघुवंशमहाकाव्यस्य निम्नोक्ते श्लोके पुंसवन-संस्कारविषये वर्णितम् । यथा –

"प्रियाऽनुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगन्तसम्पदाम् ।
यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ।"(२)

राजा दिलीपः पुत्रप्राप्तिनिमित्तं अयं संस्कारः कृतवान् । तेन स्ववैभवानुसारं स्वप्रियास्नेहानुकूलं स्वकीयालौकिकसन्तोषानुरुपं च शास्त्रोक्तविधानानुसारेण सुदक्षिणायाः पुंसवनसंस्कारः कृतः ।

**जातकर्मसंस्कारः -** शिशोः जन्मानन्तरं तथा नाभिच्छेदनात् पूर्वमेव अयं संस्कारः क्रियते । अस्मिन् संस्कारे पिता मन्त्रोच्चारणपूर्वकं सुवर्णशलाकया मधुसर्पिषां प्राशनं कुर्यात् ।अस्मिन्नवसरे निर्विघ्नप्रसवनिमित्तं, शिशोः ज्ञानवर्द्धनार्थं, जरावृद्धिनिमित्तं च कामना क्रियते । जातकर्मसंस्कारविषये महर्षिणा मनुना उक्तम् –

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ॥ "(३)

रघुवंशमहाकाव्ये जातकर्मसंस्कारस्य उल्लेखः अनेकत्र परिलक्षते । यथा –

"स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते ।
दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥"(४)

दिलीपस्य पुत्रस्य जातकर्मसंस्कारः महर्षिणा वशिष्ठेन सम्पादितः । अनेन संस्कारेण शोधितः सन् सः तथा अधिकतरं शुशुभे यथा आकरोत्थितः हीरकमणिः शाणशोधितः सन् अधिकतरां कान्तिं लभते इति ।

अपि च –

"कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः।
आनन्देनाग्रजेनेव समं ववृधिरे पितुः ॥"(५)

श्लोकेऽस्मिन् कृतसंस्काराः इति पदेन जातकर्मादिसंस्काराः इत्यर्थः अवगम्यते । अर्थात् कृतजातकर्मादयः उपमातॄणां स्तन्यपायिनः ते कुमाराः ज्येष्ठेनेव स्थितेन दशरथस्यानन्देन साकं वर्धन्ते स्म ।
अपि च -

"सखा दशरथस्यापि जनकस्य च मन्त्रकृत् ।
संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधिः ॥"(६)

दशरथस्य जनकस्य च सखा मन्त्रद्रष्टा वाल्मीकिः उभयोः नृपयोः स्नेहेन सीतायाः पुत्रयोः शास्त्रानुसारं जातकर्मसंस्कारं कृतवान् ।

**नामकरणसंस्कारः** षोडशसंस्कारेषु अयं पञ्चमसंस्कारः । मानवः स्वस्य नाम्नैव कीर्त्तिं प्रशंसां च लभते । अतः नामकरणसंस्कारः अत्यन्तो महत्त्वपूर्णः वर्तते । अयं संस्कारः

सर्वविध-लौकिक-व्यवहाराणां हेतुः, मङ्गलस्याधायकः, भाग्योदयस्य हेतुः च भवति । भारतीयहिन्दुधर्मानुसारेण प्राचीनकाले व्यक्तिगतनाम्नः महत्त्वं स्वीकृत्य नामकरणसंस्कारः क्रियते । जन्मनः दशमदिवसे द्वादशदिवसे तथा पुण्यतिथौ, शुभमुहूर्त्ते नक्षत्रे वा नामकरणं भवति । मनुस्मृतौ उक्तमस्ति यथा-

"नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् ।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते ॥"(७)

रघुवंशमहाकाव्यस्य निम्नोक्ते श्लोके नामकरणसंस्कारविषये कालिदासेन सूचना प्रदीयते । यथा –

"श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम् ॥"(८)

अर्थात् शब्दार्थयोः ज्ञाता राजा दिलीपः अयं बालकः शास्त्रस्यान्तं गमिष्यति तथा शत्रूणां विनाशको भविष्यति इति तस्य गमनशीलत्वं निश्चित्य स्वपुत्रस्य 'रघुः' इति नाम कृतवान् ।

**चूडाकर्मसंस्कारः** चूडाकर्मसंस्कारः शिशोः सौन्दर्य-दीर्घायु-कल्याणनिमित्तं च क्रियते । अस्य संस्कारस्यापरं नाम मुण्डनसंस्कारः । अस्मिन् संस्कारे जन्मनः प्रथमे तृतीये वर्षे वा धार्मिकविधानानुसारं शिशोः केशस्य प्रथमं वापनं भवति । तत्रादौ दक्षिणकेशपक्षस्य वापनं पिता क्रियते । तदनन्तरं वामकेशपक्षस्य कर्त्तनं भवति । चूडाकरणे शिखाधारणं अतीव महत्त्वपूर्णम् । संस्कारोऽयं वैदिककालादारभ्य अद्य यावत् प्रचलितोऽस्ति । रघुवंशमहाकाव्येऽपि महाकविना 'रघोः' चूडाकर्मसंस्कार-प्रसङ्गमुपस्थाप्य लिखितं यथा –

"स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥" (९)

श्लोकेऽस्मिन् 'वृत्तचूलम्' इति शब्दात् ज्ञायते यत् रघुः चूडाकरणसंस्कारेण संस्कृतः आसीदिति अत्र वर्णितोऽस्ति ।

**उपनयनसंस्कारः** वेदाध्ययनार्थं गुरोः समीपं नीयते येन संस्कारविशेषेण तदुपनयनमित्यभिधीयते । ब्राह्मणस्य उपनयनं जन्मनः अष्टमे वर्षे, क्षत्रियस्य एकादशे, वैश्यस्य च द्वादशवर्षे भवति । षोडशवर्षं यावत् ब्राह्मणस्य , द्वाविंशवर्षं यावत् क्षत्रियस्य, चतुर्विंशतिवर्षं यावत् वैश्यस्य उपनयनं कालं वर्तते । यथोक्तकालानन्तरं ब्राह्मणक्षत्रियवैश्याः अनुपनीताः पतिताः व्रात्या इति नाम्ना निन्दिताः सन्तः यज्ञविवाहादिषु सामाजिककार्येषु वहिष्कृताः भवन्ति । अनेन संस्कारेण सुसंस्कृतः जनः सामाजिकजीवने पदार्पणं करोति । महाकविकालिदासेन रघुवंशमहाकाव्ये रघोः उपनयनसंस्कारविषयेऽपि वर्णितं यथा –

"अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।
अबन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥"(१०)

अस्मात् श्लोकात् ज्ञायते यत् गर्भैकादशे वर्षे यथाविधानं रघोः उपनयनसंस्कारोऽभवत् । अनेन संस्कारेण संस्कृतं रघुं विद्वांसो गुरवः विद्याः शिक्षितवन्तः, ते च गुरवः सत्पात्रं रघुमध्याप्य सफलप्रयत्नाः सञ्जाताः ।

**केशान्त वा गोदानसंस्कारः** केशान्तसंस्कारः ब्रह्मचारीणां प्रथमतः क्षौरकर्म विधियते । अयं संस्कारः गोदानसंस्कारः नाम्नापि अभिहितोऽस्ति । कारणम् अस्मिन् संस्कारे आचार्याय गोदानं क्रियते । संस्कारोऽयं ब्रह्मचारिणः षोडशवर्षे सम्पाद्यते । संस्कारस्यान्ते ब्रह्मचारी मौनव्रतं पालयित्वा एकवर्षं यावत् अनुशासितं जीवनं यापयति । साम्प्रतमस्य संस्कारस्य प्रचलनं लुप्तप्रायो भवति ।

**विवाहसंस्कारः** भारतीयसंस्कृतौ विवाहस्य अतीव महत्त्वं वर्तते । अस्मिन् संस्कारे ब्रह्मचारी गृहस्थाश्रमे प्रविशति । पुरुषः यदा प्राप्तवयस्का भवति, तदा असमगोत्री-समजातिया-कन्यया साकं विवाहबन्धनेन आबद्धो भवति । धर्मार्थकामाः इति त्रयाणां पुरुषार्थाणां सम्पादनं विवाहस्य प्रयोजनं वर्तते । धर्मस्य अभिवृद्ध्यर्थं यज्ञकार्यनिर्वहणार्थं च विवाहमवश्यं करणीयम् । कारणं वेदे उक्तमस्ति- 'अयज्ञियो वा एष योऽपत्नीकः'। ब्राह्म-आर्ष-दैव-प्राजापत्य-गान्धर्व-आसुर-पैशाच-राक्षसाः इति ये अष्टप्रकाराः विवाहाः सन्ति, तेषु प्रथमचत्वारः प्रशस्ताः, अपराः च निन्दिताः । विवाहवन्धनस्य मुख्योद्देश्यं भवति ऐहिक-सुखप्राप्तिः, सन्तानोत्पत्तिः, वंशरक्षा च । अतः विवाहसंस्कारः वैदिकसंस्कारेषु श्रेष्ठो महत्त्वपूर्णो च भवति ।
रघुवंशमहाकाव्यस्य निम्नोक्ते श्लोके रघोः केशान्तसंस्कारस्य, विवाहसंस्कारस्य च वर्णनं जातम् । यथा –

"अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्त्तयद् गुरुः ।
नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥"(११)

अर्थात् यौवनावस्थायां प्रविष्टस्य रघोः द्वाविंशे वर्षे केशान्तसंस्कारं विधाय पश्चात् नरेन्द्रकन्याभिः सह तस्य विवाहसंस्कारोऽपि राज्ञा दिलीपेन कृतम् ।
महाकाव्येऽस्मिन् विवाहसंस्कारस्य अन्यमेकमुदाहरणम् –

"तौ समेत्य समये स्थितावुभौ भूपती वरुणवासवोपमौ।
कन्यकातनयकौतुकक्रियां स्वप्रभावसदृशीं वितेनतुः ॥"(१२)

अर्थात् जनकदशरथौ समेत्य स्वमहिमानुरुपां कन्यकानां सीतादीनां, रामादीनां पुत्राणाञ्च शास्त्रोक्तविध्यनुसारं विवाहोत्सवं कृतवन्तौ ।

**अन्त्येष्टिसंस्कारः** मानवजीवनस्य अन्तिमसंस्कारः भवति अन्त्येष्टिसंस्कारः । अनेन संस्कारेण साकं मानवस्य ऐहिकजीवनस्य समाप्तिः भवति । अन्त्येष्टिक्रियासु व्यवहृताः मन्त्राः ऋग्वेदे अथर्ववेदे च उपलब्धाः सन्ति । पुनर्जन्मवादोपरि विश्वासं कृत्वा संस्कारोऽयं क्रियते । कारणं परलोके सुखं कल्याणं च प्राप्त्यर्थं अस्य संस्कारस्य आवश्यकता वर्तते । मृतजनस्य शवदाहानन्तरं विधिविधानेन सह एकादशदिनं यावत् पिण्डदानादिकार्यं क्रियते । मृतकस्य एकवर्षं परिपूर्त्तौ गङ्गायां तथा अन्येषां पुण्यनद्यां अस्य अस्थिविसर्जनं भवति । वर्षे विगते तस्य सपिण्डिकरणं श्राद्धं भवति । प्रतिवर्षं मृतकस्य मृत्युतिथौ श्राद्धं प्रदीयते । अतः संस्कारोऽयं महत्त्वपूर्णो मन्यते ।
रघुवंशमहाकाव्ये मानवजीवनस्य अन्तिमपर्यायस्य अन्त्येष्टिसंस्कारस्य उल्लेखमस्ति । यथा –

"तयोस्तस्मिन्नवीभूतपितृव्यापत्तिशोकयोः ।
पितरिवाग्निसंस्कारात्पराववृतिरे क्रियाः ॥"(१३)

अर्थात् रामलक्ष्मणौ गृध्रराज्ञः मृत्योः अनन्तरं तस्मिन् पितरीवाग्निसंस्कारमारभ्य श्राद्धतर्पणादिं और्ध्वदैहिककर्मं कृतवन्तौ ।
अस्मिन् संस्कारविषये अस्य महाकाव्यस्य अन्यत्रापि आलोचना दृश्यते –

"तं गृहोपवन एव सङ्गताः पश्चिमक्रतुविदा पुरोधसा।
रोगाशान्तिमपदिश्य मन्त्रिणः सम्भृते शिखिनि गूढमादधुः ॥" (१४)

श्लोकेऽस्मिन् राज्ञः अग्निवर्णस्य अन्त्येष्टिसंस्कारः वर्णितोऽस्ति।
एवं रुपेण अस्मिन् शोधपत्रे रघुवंशमहाकाव्ये वर्णितानां वैदिकसंस्काराणां विवेचना संक्षिप्तरुपेण कृता ।

## उपसंहार

भारतीयसंस्कृतौ संस्काराणां महत्त्वपूर्णं स्थानं विद्यते । वैदिकसंस्कारणां अभ्युदयं भूत्वा साम्प्रतिकं कालं यावत् संस्कारविषयकाः नीतिनियमाः प्रचलिताः सन्ति । संस्कारः पवित्रमानवजन्मनः परिष्कृतनिमित्तं सुसंस्कृतनिमित्तं च भवति । आधिभौतिक-आधिदैविक-आध्यात्मिकदुःखस्य निवारणार्थं संस्कारः अत्यावश्यको भवति । महाकविः कालिदासः मानवसमाजस्य उत्कर्षसाधनार्थं रघुवंशमहाकाव्ये संस्काराणां यथाविधं वर्णनं कृतवान् । महाकाव्येऽस्मिन् महाकविः रघुवंशीयनां राज्ञां चरित्रचित्रणेन सह वैदिकसंस्काराणां प्रसङ्गं समुपस्थाप्य मानवसमाजं सन्मार्गं प्रदर्शयितुं सफलप्रचेष्टां कृतवान् ।

## सन्दर्भ

1. मनुस्मृति-२,२६-२७
2. रघुवंशम्,३/१०
3. मनुस्मृति,२/२९
4. रघुवंशम्, ३/१८
5. रघुवंशम्, १०/७८
6. रघुवंशम्-१५/३१
7. मनुस्मृति-२/३०
8. रघुवंशम्, ३/२१
9. रघुवंशम्, ३/२८
10. रघुवंशम्, ३/२९
11. रघुवंशम्, ३/३३
12. रघुवंशम्, ११/५३
13. रघुवंशम्,११/५६
14. रघुवंशम्, १९/५४
15. आप्टे , वामन शिवराम, (२००७)संस्कृत-हिन्दी कोश, मोतिलाल बनारसीदास पब्लिशर्स, दिल्ली
16. द्विवेदी, आचार्य शिवप्रसाद,(२००७)भारतीयसंस्कृति-सोपानम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी

17. दाश, अभिन्नचन्द्र,(२००३)वैदिक साहित्य ओ संस्कृति, ग्रन्थमन्दिर, विनोदविहारी, कटक
18. द्विवेदि, डा. कपिलदेव,(२०२१)संस्कृतनिबन्धशतकम्, चौखम्बा विद्याभवन, वाराणसी
19. शास्त्री, डा. रामचन्द्रवर्मा,(२०२०)रघुवंश, मनोज पब्लिकेशन्स, दिल्ली
20. त्रिपाठी, डा. कृष्णमणि,(१९८८)रघुवंशमहाकाव्यम्, चौखम्बा सुरभारती प्रकाशन
21. आचार्य, पं जितेन्द्र,(१९८९)रघुवंशमहाकाव्यम्, भारतीय विद्या प्रकाशन, वाराणसी
22. पाण्डेयः, जनार्दनशास्त्री,(१९८४)मनुस्मृतिः, मोतिलाल बनारसीदास, दिल्ली
23. कौण्डिन्न्यायनः, शिवराज आचार्य, मनुस्मृतिः, चौखम्बा विद्याभवन, वाराणसी
24. महापात्र, ड.गोपीनाथ, मनुस्मृतिः, नालन्दा, विनोदविहारी, कटके